International Journal of Sociology and Humanities
www.sociologyjournal.net
Online ISSN: 2664-8687, Print ISSN: 2664-8679
Received: 04-05-2021, Accepted: 07-06-2021, Published: 16-06-2021
Volume 3, Issue 1, 2021, Page No. 46-54

# गायत्रीशक्तिविमर्शः

[1] अर्णदाशंकर आचार्य [2] डॉ रेणु सिंह
[1] शोध प्रज्ञ, डिपार्टमेंट ऑफ संस्कृत, वाई बी एन यूनिवर्सिटी, रांची, झारखंड, भारत
[2] असिस्टेंट प्रोफेसर, हेड ऑफ संस्कृत, वाई बी एन यूनिवर्सिटी, रांची, झारखंड, भारत

DOI: https://doi.org/10.33545/26648679.2021.v3.i1a.52

**प्रस्तावना**

श्रीमदेवीभागवतमहापुराणे गायत्रीदेव्याः महिम वर्णनं नितरां रोचकं वर्तते । वैदिक ग्रन्थादारभ्य लौकिक संस्कृत ग्रन्थ पर्यन्त भगवती गायत्री विराजमानास्ति । देवीभागवस्य माहात्म्य वर्णन प्रसंग विलिख्यते -

पठितव्यं प्रयत्नेन नवरात्र चतुष्टये ।
वैदिकैर्निजगायत्रीप्रीतये नित्यशो मुने ॥

वेदसारमिदं पुण्यं पुराणं द्विजसत्तमाः ।
वेदपाठसमं पाठे श्रवणे च तथैव हि ।। दे . भा . पृ . 14

प्रयत्नपूर्वकमस्याध्ययनं कर्तव्यं नवरात्र चतुष्टये वैदिकैः, तेन माता गायत्री प्रसन्ना भविष्यति । द्विजमात्रस्य परमकर्तव्यं विद्यते गायत्र्याः उपासना । गायत्रीदेव्याः कृपां विना पुण्यफलमपि न प्राप्तुं शक्यते । गायत्री विहीनो द्विजः अधमत्वं प्राप्नोति गायत्रीमन्त्रस्य जपेन दुष्टभावाः मनसः गच्छन्ति । उपासनायाः गायत्रीशक्तेश्च महद्वर्णनं कृतं देवीभागवतमहापुराणकारेण । प्रीति र्भवति वैदिक ग्रन्थेषु । अतः अत्रापि निगदितं वेदपाठसमं प्राप्यते श्रीमदेवीभागवतस्य पारायणेन श्रवणेन । भगवान् स्कन्दः अगस्त्यं प्रति उवाच -

मित्रावरुणसम्भूत मुने शृणु कथामिमनाम् ।
यत्रैकदेशमहिमा प्रोक्तो भागवतस्य तु ।।
वर्ण्यते धर्मविस्तारो गायत्री मधिकृत्य च ।
गायत्र्या महिमा भागवतमिष्यते ।।
भगवत्या इदं यस्मात्तस्माद् भागवतं विदुः ।
ब्रह्मविष्णुशिवाराध्या भागवती हि सा ।।दे . मा . 4 / 3, 4, 5

भागवतग्रन्थस्य लक्षणं प्रोच्यते - यस्य ग्रन्थस्य एकांशे भागवतस्या महिमवर्णनं निगद्यते, धर्मस्य विशदवर्णनं स्यात् तथा च गायत्र्याः आरम्भं कृत्वा तस्याः महिमवर्णनं स्यात्, एतादृश ग्रन्थः भागवतनाम्ना सुशोभते । पुराणमिदं भगवत्याः पराम्बायाः माहात्म्येन परिपूर्ण वर्ततेऽतः देवीभागवतमिति नाम्ना प्राज्ञेः जेगीयते । सा परा भगवती ब्रह्माविष्णुमहेश्वराणा माराध्या वर्तते।

- **गायत्रीमहिमा**

श्रीमदेवीभागवतमहापुराणस्य द्वादशे स्कन्धे नारदनारायणयोः संवादप्रसंगानुसारेण गायत्री देव्याः महिमा आरभ्यते । नारदेनोक्तं हे देव ! हे प्रभो ! भवान् सदाचार विधीनां वर्णनमकरोत्; तेषां विधीनां वर्णनमत्यन्तमहत्त्वपूर्णं विद्यते माहात्म्यामतुलनीयं वर्तते । सर्वपापप्रणाशकमिदं वर्णनं विद्यते । भवतः मुखपङ्कजात् निःसृत देवीकथारूपामृतश्रवणमहं कृतवान् ; किन्तु चान्द्रायणादि मुख्यव्रतानां यथा भवता वर्णनं कृतं तथातु अत्यन्तकष्टसाध्यानीमानि व्रतानि अनुभूयन्ते । सामान्यजनाः एतानि व्रतानि न कर्तुं सक्षमाः सन्ति । अतः तादृशोपायान् वदतु ये उपायाः सुख साध्याः भवेयुः । हे स्वामिन! हे सुरेश्वर! भवान् कृपया तत्कर्मानुष्ठानं वदतु मां यत् सुखसाध्यं स्यात् । मङ्गलकारि, सिद्धिदायकं, भगवत्याःप्रसन्नताप्रदायकञ्च कर्मानुष्ठानमुपदिशन्तु मां कृपया । हे नारायण! भवान् सदाचारविधानानिरूपणावसरे यस्य गायत्रीविधेः वर्णनं कृतवान्, तस्मिन् मुख्यतमं वस्तु किम् ? किं करणेन अधिकाधिकपुण्यप्राप्तिर्जायते भवता यानि गायत्र्याः चतुर्विंशत्यक्षराणि निगदितानि तेषामक्षराणां के के ऋषयः ? कानि कानि छन्दांसि ? के के देवाः कथिता ? हे प्रभो ! एतत्सर्वं मां वदतु । मम मनसि महत्कौतूहलमुत्पद्यते । श्रीनारायण उवाच -

कुर्यादन्यन्न वा कुर्यादनुष्ठानादिकं तथा ।
गायत्रीमात्रनिष्ठस्तु कृतकृत्यो भवेद्विजः ।।
सन्ध्यासु चार्घ्यदानं च गायत्रीजपमेव च ।
सहस्रत्रितयं कुर्वन्सुरैः पूज्यो भवेन्मुने ।।
न्यासान्करोतु मा वा गायत्रीमेव चाभ्यसेत् ।
ध्यात्वा निर्व्याजया वृत्या सच्चिदानन्दरूपिणीम् ।।
यदक्षरैकसंसिद्धेः स्पर्धते ब्राह्मणोत्तमः ।
हरिशंकरकञ्जोत्थसूर्यचन्द्रहुताशनैः ।। दे . भा . 12 / 1 / 8 -11

अर्थात् - द्विजः किमपि अन्यत् अनुष्ठानं कुर्यात् न वा, किन्तु एकोनिष्ठो भूत्वा केवलगायत्रीदेव्युपासनां कुर्यात् तर्हि स कृकृत्यो भवति ।
गायत्र्यनुष्ठानेन द्विजो मुक्तो भवति । एकनिष्ठता आवश्यकी वर्तते । त्रिषु सन्ध्यासु भगवते सूर्याय अर्घ्यप्रदाता सहस्रत्रय गायत्रीमन्त्रजपकर्ता च देवानामपि पूज्यो भवति देवा अपि एतादृशं जनं सम्मानयन्ति । न्यासं करोतु न वा किन्तु निष्कपट भावेन भगवती सच्चिदानन्दस्वरूपिणीगायत्रीदेवीं ध्यात्वा गायत्रीजपमवश्यं कुर्यात् । तस्य मन्त्रस्य

एकक्षरस्यापि सिद्धौ सत्यां ब्रह्मविष्णुमहेशसूर्यचन्द्राग्निभिः सह स्पर्धितुं योग्यो भवति ब्राह्मणश्रेष्ठः।

अथातः श्रूयतां ब्रह्मन् वर्णऋष्यादिकांस्तथा ।

छन्दांसि देवतास्तद्वत्क्रमात्रत्वानि चैव हि ॥ दे . भा . 12 / 1 / 12

हे ब्रह्मन ! अधुना भवान् गायत्र्याः वर्णर्षिछन्दोदेवतादितत्त्वविषये क्रमेण शृणोतु ।

वामदेवः, अत्रिः, वसिष्ठः, शुक्रः, कण्वः, पराशरः, महातेजस्वीविश्वामित्रः, कपिलः, महानशौनकः, याज्ञवल्क्यः, भरद्वाजः, तपो- निधिः जगदग्निः, गौतमः, मुद्गलः, वेदव्यासः, लोमशः, अगस्त्यः, कौशिकः, वत्सः, पुलस्त्यः, माण्डुकः, तपस्विषुश्रेष्ठोदुर्वासाः, नारदः, कश्यपश्चेति चतुर्विंशतिः ऋषयः सन्ति क्रमशः गायत्री मन्त्रस्थ वर्णानाम् । इमानि छन्दांसि गायत्री मन्त्रस्य विद्यते - अनुष्टुप, बृहती, पंक्ति, त्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, धृतिः, अतिधृतिः, विराट, प्रस्तारपंक्तिः, कृतिः, प्रकृतिः, आकृतिः, विकृतिः, संकृतिः, अक्षरपंक्तिः, भूः, भुवः, स्वः, तथा ज्योतिष्मति चेति ।

● **चतुर्विंशतिवर्णानां देवताः** - प्रथमवर्णस्य देवता अग्निः, द्वितीयवर्मस्य देवता प्रजापतिः, तृतीयवर्णस्य चन्द्रः, चतुर्थवर्णस्य ईशानः, पञ्चमवर्णस्य सविता, षष्ठवर्णस्य आदित्यः, सप्तमवर्णस्य बृहस्पतिः, अष्टमवर्णस्य मित्रावरुणः, नवमवर्णस्य भगः, दशमवर्णस्य देवता ईश्वर, एकादशवर्णस्य देवता गणेशः, द्वाददशवर्णस्य त्वष्टा, त्रयोदशवर्णस्य देवता पुषा चतुर्दशवर्णस्य देवती इन्द्राग्निः, पञ्चदशवर्णस्य देवता वायुः, षोडशवर्णस्य देवता वामदेवः, सप्तदशवर्णस्य देवता मित्रावरुणः, अष्टादशवर्णस्य देवता विश्वेदेवः, एकोनविंशवर्णस्य देवता मातृकः, विंशवर्णस्य देवता विष्णुः, एकविंशवर्णस्य देवता वसुः, द्वाविंशवर्णस्य देवता रूद्रः त्रयोविंशवर्णस्य देवता कुबेरः, चतुर्विंशवर्णस्य देवता देवःअश्विनीकुमारश्च वर्तते ।

नाम संग्रहोऽयं परमश्रेष्ठ महापाप प्रणाशकर च वर्तते . एतस्य संग्रहस्य श्रवणमात्रेण साङ्गोपाङ्गायत्री जपस्य फलं प्राप्यते ।

● **चतुर्विंशतिवर्णानां शक्तयः वर्णानि च** - वामदेवी, प्रिया, सत्या, विश्वा, भद्रविलासिनी, प्रभावती, जया, शान्ता, कान्ता, दुर्गा, सरस्वती, विद्दमा, विशाललेशा, व्यापिनी, विमला, तमोपहारिणी, सूक्ष्मा, विश्वयोनिः, जया, वशा, पद्मालया, पराशोभा, भद्रा, त्रिपदेति चतुर्विंशतिः गायत्रीवर्णानां शक्तयः सन्ति ।

● **चतुर्विंशतिवर्णानां ( अक्षराणां ) वर्णानि** -

चम्पकवर्णः, अतसीपुष्पसदृशवर्णः, विद्रुमवर्णः, स्फटिकवर्णः, कमलपुष्पसदृशवर्णः, तरुणसूर्यसदृशवर्णः, शंखकुन्दचन्द्रवर्णः, रक्तकमलपत्रवर्णः पद्मरागवर्णः, इन्द्रनीलमणिवर्णः, मौलिकवर्णः, कुमकुमवर्णः, अञ्जन वर्णः, रक्तचन्दनवर्णः, वैदूर्यवर्णः, मधुवर्णः, हरिद्रावर्णः, कुन्दवर्णः दुग्ध वर्णोवा, सूर्यकान्तमणिवर्णः, शुकपुच्छसदृशवर्णः, कमलपुष्पवर्ण, केतकीपुष्पवर्णः, मल्लिकापुष्पवर्णः, केतकीपुष्पवर्णश्चेति ।

- **वर्णानां तत्त्वानि** - पृथ्वी, जलं, तेजः, वायुः, आकाशः, गन्धः, रसः, रूपं, शब्दः, स्पर्शः जननेन्द्रियं, गुदा, पादौ, हस्तौ, मुख, नासिका, जिह्वा, नेत्रं, त्वक्, कर्णौ, प्राणाः, अपानवायुः, व्यानवायुः, समानवायुश्चेति ।

**वर्णानांचतुर्विंशतिमुद्राः**

सुमुखं सम्पुटं चैव विततं विस्तृतं तथा ।
द्विमुखं त्रिमुखं चैव चतुःपञ्चमुखं तथा ॥
षण्मुखाधोमुखं चैव व्यापकाञ्जलिकं तथा ।
शकटं यमपाशं च ग्रथितं सन्मुखोन्मुखम् ॥
विलम्बं मुष्टिक चैव मत्स्यं कूर्मं वराहकम् ।
सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा ॥
त्रिशूलयोनी सुरभिश्चाक्षमाला च लिङ्गकम् ।
अम्बुजं च महामुद्रास्तुर्थरूपाः प्रकीर्तिताः ॥
इत्येताः कीर्तिता मुद्रा वर्णानां ते महामुने ।
महापापक्षयकराः कीर्तिदाः कान्तिदा मुने ।। दे . भा . 12/3/14-18

एताः मुद्राः धोरपापस्यापि नाशकर्यः विद्यन्ते । कीतिप्रदात्र्यः, कान्तिप्रदात्र्यश्च सन्त्येताः गायत्रीदेव्याः चतुर्विंशतिमुद्राः । सन्ध्यावन्दनकाले एतासां मुद्राणां प्रदर्शनं क्रियते । त्रिशूलयोनिसुरभ्यक्षमालालिङ्गाम्बुजमुद्राः तुर्यमुद्राः चतुर्थचरणस्य मुद्राः वा सन्ति ।

**गायत्रीदेव्याः ध्यानं गायत्रीदेव्याः कवचञ्च -**

**श्रीनारायणउवाच -**

अस्त्येकं परमं गुह्यं गायत्री कवचं तथा ।
पठनाद्धारणान्मर्त्यः सर्वपापैः प्रमुच्यते ॥
सर्वान्कामानवाप्नोति देवीरूपश्च जायते ।

गायत्री कवचस्यास्य ब्रह्मविष्णुमहेश्वराः ॥ दे . भा . 12/3/4,5
गायत्रीकवचनामकः कश्चित् परमगोपनीयोपायो वर्तते । यस्य पाठेन धारणेन च समस्त पापैः विमुक्ताः भवन्ति मानवाः । गायत्रीकवचधारकस्य सर्वकामाः पूर्णतां यान्ति । स्वयमपि देवीरुपं भवति ।
ॐ अस्य श्रीगायत्रीकवचस्य ब्रह्मविष्णुमहेश्वराः ऋषयः, ऋग्यजुःसामाथर्वश्छन्दांसि, गायत्रीदेवता, भर्गोबीजं, भर्गशक्तिः, धीः कीलकं मोक्षार्थे जपे विनियोगः ।

**अथध्यानम् -**

मुक्ताविद्रुमहेमनीलधवलच्छायैमुखैस्त्रीक्षणैयुक्तामिन्दु
निबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङकुशकशाः शुभं कपालं गुणं
शंखं चक्रमथारविन्द्रयुगलं हस्तैर्वहनीं भजे ॥

**कवचम्**

गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ।
ब्रह्मसन्ध्या तु मे पश्चादुत्तरायां सरस्वती ॥
पार्वती मे दिशं रक्षेत्पावकीं जलशायिनी ।
यातुधानी दिशं रभेद् यातुधानभयंकरी ।।
पावमानीं दिशं रक्षेत्पवमानविलासिनी ।
दिशं रौद्री च मे पातु रुद्राणी रूद्ररूपिणी ।।
ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा ।
एवं दश दिशो मे रक्षेत्सर्वांग भुवनेश्वरी ।।
तत्पदं पातु मे पादौ जंघे मे सवितुः पदम् ।
वरेण्यं कटिदेशे तु नाभि भर्गस्तथैव च ।।
देवस्य मे तद्धृतयं धीमहीति चगल्लयोः ।
धियः पदं च मे नेत्रे यः पदं मे ललाटकम् ।।
नः पातु मे पदं मूर्ध्नि शिखायां मे प्रचोदयात् ।
तत्पदं पातु मूर्धानं सकारः पातु भालकम् ।।
चक्षुषी तु विकारार्णो स्तुकारस्तु कपोलयोः ।
नासापुटं वकारार्णो रेकारस्तु मुखे तथा ।।
णिकार उर्ध्वमोष्ठं तु यकारस्त्वधरोष्ठकम् ।
आस्यमध्ये भकारार्णो र्गोकारश्चिबुके तथा ।।
देकारः कण्ठदेशे तु वकारः स्कन्धदेशकम् ।
स्यकारों दक्षिणं हस्तं धीकारो वामहस्तकम् ॥
मकारो हृदयं ह रथेधिकार उदरे तथा ।
धिकारो नाभिदेशे तु योकारस्तु कटिं तथा ।।
गुह्यं रक्षतु योकार ऊरू द्वौ नः पदाक्षरम् ।
प्रकारो जानुनी रक्षेच्चोकारो जंघदेशकम् ।।
दकारं गुल्फदेशे तु यकारः पदयुग्मकम् ।
तकारव्यञ्जनं चैव सर्वांगे मे सदावतु ।।
इदं तु कवचं दिव्यं बाधाशतविनाशनम् ।
चतुःषष्टिकलाविद्यादायकं मोक्षकारकम् ।।
मुच्यते सर्वपापेभ्यः परंब्रह्माधिगच्छति ।

पठनाच्छ्रवणाद्वापि गोसहस्रफलं लभेत् ।। दे . भा . 12/3/10 -25

इति श्रीमदेवीभागवतमहापुराणेऽष्टादशसाहस्रयां संहितायां द्वादशस्कन्धे गायत्रीमन्त्रकवचवर्णनं सम्पूर्णम् ।
गायत्रीदेव्याः इदं दिव्यकवचं बाधाशतविनाशनं चतुःषष्टिकलाविद्यादायकं मोक्षकारकञ्चवर्तते । पठनात्श्रवणादस्य सर्वपापेभ्यः मुच्यते, गोसहस्रदानफलं लभते, परंब्रह्माधिगच्छति च गायत्रीदेव्याः उपासकः ।

**गायत्रीहृदयं तस्याः अङ्गन्यासश्च**

देव्याः गायत्र्याः हृदयस्तोत्रमथर्ववेदे वर्णितमस्ति स्पष्टरूपेण । स्तोत्रमिदं रहस्येष्वपि रहस्यतमं वर्तते । विराड्रूपां वेदमातरं महादेवीं गायत्रीं ध्यात्वा अङ्गेषु देवानां ध्यानं कर्तव्यम् । साधकः यथा पिण्डब्रह्माण्डयोरैक्य वर्तते, तथा स्व-देव्योश्चाभेदत्व कल्पनां कुर्यात् । देव्याः रूपेण स्वस्मिन् शरीरे तन्मयत्वभावो भवेत् । देवभावेन सम्पन्नो भूत्वा देवानामर्चनं कर्तव्यम् । अभेदसम्पादनाय शरीरे
देवत्वमावश्यकं विद्यते । हृदयस्तोत्रस्य स्वरूपमित्थं वर्तते -

श्रीनारायणउवाच अथ तत्सम्प्रवक्ष्यामि तन्मयत्वमथो भवेत् ।
गायत्रीहृदयस्यास्याप्यहमेव ऋषिः स्मृतः ॥
गायत्रीच्छन्द उद्दिष्टं देवता परमेश्वरी ।
पूर्वोक्तेन प्रकारेण कुर्यादंगानि षट्क्रमाता ।।
आसने विजने देशे ध्यायेदेकाग्र मानसः ॥ दे . भा . 12/4/7,8

**न्यासः**

धौर्मूर्ध्नि दैवतम् दन्तपङ्क्तावश्विनौ । उभे सन्ध्ये चोष्ठौमुख मग्निः । जिह्वा सरस्वती । ग्रीवायां तु बृहस्पतिः । स्तनयोर्वसवोऽष्टौ । बाइवोर्मरुतः । हृदये पर्जन्यः । आकाशमुदरम् । नाभावन्तरिक्षम् । कट्योरिन्द्राग्नी । जघने विज्ञानघनः प्रजापतिः । कैलासमलये ऊरू । विश्वेदेवा जान्वोः । जङ्घायां कौशिकः । गुह्यमयने । ऊरुपितरः । पादौ पृथिवी । वनस्पतयोऽङ्गुलीषु । ऋषयो रोमाणि । नखानि मुहूर्तानि । अस्थिषु ग्रहाः । असृङ्मांसमृतवः । संवत्सरा वै निमिषम् । अहोरात्रावादित्यश्चन्द्रमाः । प्रवरां दिव्यां गायत्रीं सहस्रनेत्रां शरणमहं प्रपद्ये । ॐ तत्सवितुर्वरेण्याय नमः । ॐ तत्पूर्वाजयाय नमः । तत्प्रातरादित्याय नमः । तत्प्रातरादित्यप्रतिष्ठायै नमः । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायंमधीयानो दिवसकृतं पापं नाशयति । सायंप्रातरधीयानो अपापो भवति । सर्वतीर्थेषु स्नातो भवति । सर्वेदेवैर्ज्ञातो भवति । अवाच्यवचनात्पूतो भवति । अभक्ष्यभक्षणात्पूतो भवति । अभोज्यभोजनात्पूतो भवति । अचोष्यचोषणात्पूतो भवति । असाध्यसाधनात्पूतो भवति । दुष्प्रतिग्रहशतसहस्रात्पूतो भवति । सर्वप्रतिग्रहात्पूतो भवति । पंकितदूषणात्पूतो भवति । अनृतवचनात्पूतो भवति । अथाब्रह्मचारी ब्रह्मचारी भवति । अनेन हृदयेनाधीतेन क्रतुसहस्रेणेष्टं भवति ।

षष्टिशतसहस्रगायत्र्या जप्यानि फलानि भवन्ति । अष्टौ ब्राह्मणान्सम्यग्ग्राहयेत् । तस्य सिद्धिर्भवति । य इदं नियमधीयानो ब्राह्मणः प्रातः शुचिः सर्वपापैः प्रमुच्यत इति । ब्रह्मलोके महीयते । इत्याह भगवान श्रीनारायणः अनेन प्रकारेण गायत्रीहृदयस्तोत्रं निगदितं भगवता नारायणेन श्रीमद्देवीभागवतमहापुराणे ।

**श्रीमद्देवीभागवतमहापुराणे गायत्री स्तोत्रम् -**
**श्रीनारायण उवाच**

आदिशक्ते जगन्मातर्भक्तानुग्रहकारिणी ।
सर्वत्र व्यापिकेऽनन्ते श्रीसन्ध्ये ते नमोऽस्तुते ।।
त्वमेव सन्ध्या गायत्री सावित्री च सरस्वती ।
ब्राह्मी च वैष्णवी रौद्री रक्ता श्वेत सितेतरा ।।
प्रातर्बाला च मध्याह्ने यौवनस्था भवेत्पुनः ।
वृद्धा सायं भगवती चिन्त्यते मुनिभिः सदा ॥
हंसस्था गरुडारूढा तथा वृषभवाहिनी ।
ऋग्वेदाध्यायिनी भूमौ दृश्यते या तपस्विभिः ॥
यजुर्वेदं पठन्ती च अन्तरिक्षे विराजते ।
सा सामगापि सर्वेषु भ्राम्यमाणा तथा भुवि ॥
रुद्रलोकं गतात्वं विष्णुलोकनिवासिनी ।
त्वमेव ब्रह्मणो लोकेऽमर्त्यानुग्रहकारिणी ॥
सप्तर्षिप्रीतिजननी माया बहुवरप्रदा ।
शिवयोः करनेत्रोत्था ह्यश्रुस्वेदसमुद्भवा ॥
आनन्दजननी दुर्गा दशधा परिपठ्यते ।
वरेण्या वरदा चैव वरिष्ठा वरवर्णिनी ।।
गरिष्ठा च वारार्हा च वरारोहा च सप्तमी ।
नीलगंगा तथा सन्ध्या सर्वदा भोगमोक्षदा ।।
भागीरथी मर्त्यलोके पाताले भोगवत्यपि ।
त्रिलोकवाहिनी देवी स्थानत्रयनिवाशिनी ।।
भूर्लोकस्था त्वमेवासि धरित्री लोकधारिणी ।
भुवो लोके वायुशक्तिः स्वर्लोके तेजसा निधिः ॥
महलोके महासिद्धिर्जनलोके जनेत्यपि ।
तपस्विनी तपलोके सत्यलोके सत्यवाक् ।।
कमला विष्णुलोके गायत्री ब्रह्मलोकदा ।
रुद्रलोके स्थिता गौरी हरार्धंगनिवासिनी ।।
अहमो महतचैव प्रकृतिस्त्वं गीयसे ।
सम्यावस्थात्मिका त्वं हि शबलब्रह्मरुपिणी ।।

ततः परा परा शक्तिः परमा त्वं हि गीयसे ।
इच्छाशक्तिःक्रियाशक्तिर्ज्ञानशक्तिस्त्रिशक्तिदा ।।
गंगा च यमुना चैव विपाशा च सरस्वती ।
सरयूर्देविका सिन्धुर्नर्मदेरावती तथा ।।
गोदावरी शतद्रूश्च कावेरी देवलोकगा ।
कौशिकी चन्द्रभागा च वितस्ता च सरस्वती ।।
गण्डकी तापिनी तोया गोमती वेत्रवत्यपि ।
इडा च पिंगला चैव सुषुम्णा च तृतीयका ।।
गान्धारी हस्तिजिह्वा च पूषापूषा तथैव च ।
अलम्बुषा कुहुश्चैव शंखिनी प्राणवाहिनी ।।
नाडी चत्वं शरीरस्था गीयसे प्राक्तनैबुधैः ।
हृत्पद्मस्था प्राणशक्तिः कण्ठस्था स्वप्ननायिका ।।
तालुस्या त्वं सदाधारा बिन्दुस्था बिन्दुमालिनी ।
मूले तु कुण्डलीशक्तिव्यापिनी केशमूलगा ।।
शिखामध्यासना त्वं शिखाग्रे तु मनोन्मनी ।
किमन्यद् बहुनोक्तेन यत्किञ्चिज्जगतीत्रये ।।
तत्सर्वं त्वं महादेवि श्रीये सन्ध्ये नमोऽस्तुते ।
इतीदं कीर्तितं स्तोत्रं सन्ध्यायां बहुपुण्यदम् ।।
महापापप्रशमनं महासिद्धि विधायकम् ।
य इदं कीर्तयेत्स्तोत्रं सन्ध्याकाले समाहितः ।।
अपुत्रः प्राप्नुयात्पुत्रं धनार्थी धनमाप्नुयात् ।
सर्वतीर्थतपोदानयज्ञयोगफलं लभेत् ।।
भोगान्मुक्त्वा चिरं कालमन्ते मोक्षमवाप्नुयात् ।
तपस्विभिः कृतं स्तोत्रं स्नानकाले तु पठेत् ।।
यत्र कुत्र जले मग्नः सन्ध्यामज्जनजं फलम् ।
लभते नात्र सन्देहः सत्यं सत्यं नारद ॥
शृणुयाद्योऽपि यद्भक्त्या स तु पापात्प्रमुच्यते ।
पीयूषसदृशं वाक्यं सन्ध्योक्तं नारदेरितम् ।। दे . भा . 12/5/2-29

श्रीमद्देवीभागवतमहापुराणेऽष्टादशसाहस्रयां संहितायां द्वादशस्कन्धे श्रीगायत्रीस्तोत्रवर्णनं सम्पूर्णम् । अस्मिन् स्तोत्रे गायत्रीदेव्याः समग्ररूपेणोपस्थापनं दृश्यते यथाग्रन्थं परिवर्तनमकृत्वा श्रद्धालूनां जनानां लाभाय पाठाय च प्रदत्तं मया । श्रद्धापूर्वकमस्य वाचनेन निश्चयेन फलं लभते सांधकः ।

भगवत्याः गायत्रीदेव्याः अष्टोत्तरसहस्रनामस्तोत्रम् –

अस्य स्तोत्रस्य ब्रह्मा ऋषिः, अनुष्टुप छन्दः, देवता, हलो बीजानि, स्वराः शक्तयश्च सन्ति । मातृकायाः षड़क्षराणि षडङ्गन्यासाः, षटकरन्यासाश्च सन्ति । अस्य स्तोत्रस्य ध्यानमित्थं वर्तते-

रक्तश्वेतहिरण्यनीलधवलैयुक्तां त्रिनेत्रोज्ज्वलां
रक्तां रक्तनवस्रजं मणिगोणैयुक्तां कुमारीमिमाम् ।
गायत्रीं कमलासनां करतलव्यानद्धकुण्डाम्बुजां
पद्माक्षीं च वरस्रजं च दधती हंसाधिरूढां भजे ॥ दे . भा . 12/6/9

अनेन प्रकारेण मातुः ध्यानं कृत्वा सहस्रनामस्तोत्रस्य पाठः क्रियते । सहस्रनामस्तोत्रमिदं पुण्यप्रदं सर्वपापघ्न महासम्पत्तिदायकञ्च विद्यते । अनेन स्तोत्रेण भगवती गायत्री सन्तुष्टा भवति । ब्राह्मणैः सह विशेषतया अष्टम्यां तिथौ अस्य स्तोत्रस्य पाठः करणीयः सम्यक्प्रकारेण जपहोमपूजाध्यानानि कृत्वा अस्य पाठः समाचरेत् । यस्मै कस्मै अस्योपदेशः न करणीयः, अपितु सुभक्ताय, सुशिष्याय, भूसुरायचावश्यं वक्तव्यम् । पथभ्रष्टसाधकानां समक्षमस्योपदेशः न करणीय यस्मिन् गृहे गायत्रीसहस्रनामस्तोत्रग्रन्थो भवति, न तत्र भयमागच्छति । अत्यन्नचपलक्ष्मीरपि गृहे स्थिरा भवति । इदं परमं रहस्य गुह्याद् गुह्यतरं मनुष्याणां पुण्यप्रदं दरिद्राणां निधिप्रदं, मुमुक्षूणां कामिनां सर्वकामदञ्च वर्तते । सहस्रनामस्तोत्रस्य प्रभावेण रोगात् रोगी, बन्धनात् बद्धश्च मुच्यते । ब्रह्महत्या सुरापान सुवर्णस्तेयिनो गुरुतत्पगतोवापि नराः सकृदेव पठनात् मुच्यन्ते । निन्दनीयप्रतिग्रहजन्यपापात्, अभक्ष्यभक्षणजन्यपापात्, पाखण्डपूर्णव्यवहारजन्यपापात, मिथ्याभाषणादिजन्यपापाच्च विमुक्ताः भवन्ति अस्य स्तोत्रस्य पठनेन । नारयणोक्तमिदं परमरहस्यपूर्णं गायत्र्याः परमकृपया ब्रह्मसायुज्यप्रदायकञ्च वर्तते । अस्यां वार्तायां संशय न कर्तव्यः । सत्यं सत्यमिति द्विवारमुक्त हरिणा ग्रन्थकारेण वा । द्विवारेण विषयस्य दृढीकरणं भवति । अर्थात् यथा फलश्रुतिरुक्ता सा निश्चयेन सत्यमेव विद्यते, नात्र संशयः ।